শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে কিষ্কিন্ধাকাণ্ডে

# ॥ পঞ্চপঞ্চাশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ পঞ্চপঞ্চাশঃ সর্গঃ ॥

## অঙ্গদসহিতানাং ৱানরাণাং প্রাযোপৱেশনম্

শ্রুৎৱা হনুমতো ৱাক্যং প্রশ্রিতং ধর্মসংহিতম্।
স্বামিসৎকারসংযুক্তমঙ্গদো ৱাক্যমব্রৱীৎ॥ **4.55.1** ॥

স্থৈর্যমাত্মমনঃশৌচমানৃশংস্যমথার্জৱম্।
ৱিক্রমশ্চৈৱ ধৈর্যং চ সুগ্রীৱে নোপপদ্যতে॥ **4.55.2** ॥

ভ্রাতুর্জ্যেষ্ঠস্য যো ভার্যাং জীৱতো মহিষীং প্রিযাম্।
ধর্মেণ মাতরং যস্তু স্বীকরোতি জুগুপ্সিতঃ॥ **4.55.3** ॥

কথং স ধর্মং জানীতে যেন ভ্রাত্রা দুরাত্মনা।
যুদ্ধাযাভিনিযুক্তেন বিলস্য পিহিতং মুখম্॥ **4.55.4** ॥

সত্যাৎ পাণিগৃহীতশ্চ কৃতকর্মা মহাযশাঃ।
ৱিস্মৃতো রাঘৱো যেন স কস্য সুকৃতং স্মরেৎ॥ **4.55.5** ॥

লক্ষ্মণস্য ভযেনেহ নাধর্মভযভীরুণা।
আদিষ্টা মার্গিতুং সীতা ধর্মস্তস্মিন্ কথং ভৱেৎ॥ **4.55.6** ॥

তস্মিন্ পাপে কৃতঘ্নে তু স্মৃতিভিন্নে চলাত্মনি।
আর্যঃ কো ৱিশ্ৱসেজ্জাতু তৎকুলীনো ৱিশেষতঃ॥ **4.55.7** ॥

রাজ্যে পুত্রঃ প্রতিষ্ঠাপ্যঃ সগুণো নির্গুণোঽপি ৱা।
কথং শত্রুকুলীনং মাং সুগ্রীৱো জীৱযিষ্যতি॥ **4.55.8**॥

ভিন্নমন্ত্রোঽপরাদ্ধশ্চ ভিন্নশক্তিঃ কথং হ্যহম্।
কিষ্কিন্ধাং প্রাপ্য জীৱেযমনাথ ইৱ দুর্বলঃ॥ **4.55.9**॥

উপাংশুদণ্ডেন হি মাং বন্ধনেনোপপাদযেৎ।
শঠঃ ক্রূরো নৃশংসশ্চ সুগ্রীৱো রাজ্যকারণাৎ॥ **4.55.10**॥

বন্ধনাচ্যাৱসাদান্মে শ্রেযঃ প্রাযোপৱেশনম্।
অনুজানন্তু মাং সর্ৱে গৃহং গচ্ছন্তু ৱানরাঃ॥ **4.55.11**॥

অহং ৱঃ প্রতিজানামি ন গমিষ্যাম্যহং পুরীম্।
ইহৈৱ প্রাযমাসিষ্যে শ্রেযো মরণমেৱ মে॥ **4.55.12**॥

অভিৱাদনপূর্ৱং তু রাজা কুশলমেৱ চ।
অভিৱাদনপূর্ৱং তু রাঘৱৌ বলশালিনৌ॥ **4.55.13**॥

ৱাচ্যস্তাতো যৱীযান্ মে সুগ্রীৱো ৱানরেশ্ৱরঃ।
আরোগ্যপূর্ৱং কুশলং ৱাচ্যা মাতা রুমা চ মে॥ **4.55.14**॥

মাতরং চৈৱ মে তারামাশ্ৱাসযিতুমর্হথ।
প্রকৃত্যা প্রিযপুত্রা সা সানুক্রোশা তপস্ৱিনী॥ **4.55.15**॥

ৱিনষ্টমিহ মাং শ্রুৎৱা ৱ্যক্তং হাস্যতি জীৱিতম্।
এতাৱদুকৎৱা ৱচনং ৱৃদ্ধাংস্তানভিৱাদ্য চ॥ **4.55.16**॥

ৱিৱেশ চাঙ্গদো ভূমৌ রুদন্ দর্ভেষু দুর্মনাঃ।
তস্য সংৱিশতস্তত্র রুদন্তো ৱানরর্ষভাঃ॥ **4.55.17**॥

নযনেভ্যঃ প্রমুমুচুরুষ্ণং ৱৈ ৱারি দুঃখিতাঃ।
সুগ্রীৱং চৈৱ নিন্দন্তঃ প্রশংসন্তশ্চ ৱালিনম্॥ **4.55.18**॥

পরিৱার্যাঙ্গদং সর্ৱে ৱ্যৱসন্ প্রাযমাসিতুম্।
তদ্ ৱাক্যং ৱালিপুত্রস্য ৱিজ্ঞায প্লৱগর্ষভাঃ ॥ **4.55.19** ॥

উপস্পৃশ্যোদকং সর্ৱে প্রাঙ্মুখাঃ সমুপাৱিশন্।
দক্ষিণাগ্রেষু দর্ভেষু উদক্তীরং সমাশ্রিতাঃ ॥ **4.55.20** ॥

মুমূর্ষৱো হরিশ্রেষ্ঠা এতৎ ক্ষমমিতি স্ম হ।
রামস্য ৱনৱাসং চ ক্ষযং দশরথস্য চ ॥ **4.55.21** ॥

জনস্থানৱধং চৈৱ ৱধং চৈৱ জটাযুষঃ।
হরণং চৈৱ ৱৈদেহ্যা ৱালিনশ্চ ৱধং তথা।
রামকোপং চ ৱদতাং হরীণাং ভযমাগতম্ ॥ **4.55.22** ॥

স সংৱিশদ্ভির্বহুভির্মহীধরো
    মহাদ্রিকূটপ্রতিমৈঃ প্লৱঙ্গমৈঃ।
বভূৱ সন্নাদিতনির্দরান্তরো
    ভৃশং নদদ্ভির্জলদৈরিৱাম্বরম্ ॥ **4.55.23** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
কিষ্কিন্ধাকাণ্ডে পঞ্চপঞ্চাশঃ সর্গঃ ॥